National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 43-44
© 2025 NJHSR
www.sanskritarticle.com

**दिवेश वेहेरा**
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**दिवेश वेहेरा**
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# विवाहे मङ्गलदोषविचारः

**दिवेश वेहेरा**

ज्योतिषशास्त्रस्य विषयः सूक्ष्मः ग्रहनश्चास्ति अस्य प्रयोजनं केवलं भविष्यत्कालिकीनां घटनानां परिचयकरणमेव नास्ति अपितु परिचयं दत्वा लाभप्रदानमपि अस्ति। जीवने अनेके जनाः अस्माकं सम्पर्के आगत्य अस्मान् प्रभावितान् कुर्वन्ति। दाम्पत्यजीवनस्य फलनिरूपणेनुसन्धानशीलाः ज्योतिषशास्त्रस्य मनीषिणाः आचार्याः निरन्तरमत्वेषणरताः आसान् सम्प्रत्यपि ज्योतिषज्ञाः अनुसन्धानस्ता सन्ति। विवाहात्पूर्वं वरवध्वोः मेलकविचारः अत्यन्तमावश्यकं भवति। ग्रहमेलापके पापग्रहाणां प्रबलतां निर्बलता च दृष्ट्वा एवं माङ्गलिकदोषस्य विचारो भवति। माङ्गलिक दोषस्य यदि जन्माङ्गे परिहारो मिलति तद् दाम्पत्यजीवनं सुखमयं भवति। माङ्गलिकदोषरहितवरकन्ययोः दाम्पत्य-सम्बन्धं सुदृढीकरणर्थमपि ग्रहमेलापककार्यं महत्त्वपूर्ण भूमिका निर्वहति।

वस्तुतः दाम्पत्यजीवनस्य दाम्पत्यसुखस्य च निर्णायकेष्वनेकेषु महत्त्वपूर्णतथ्येषु माङ्गलिकदोषः अन्यतमोऽस्ति। अयं न तु स्वयमेव एकान्ततः दाम्पत्यजीवनं कर्तुं शक्यते, न च दुःखमयम्। अतः माङ्गलिकदोषस्य प्रभावस्य निर्मय अत्यावश्यकः। तस्य निर्बलत्वं प्रवलत्वं च दृष्वा समुचितं निर्णयेनैव दाम्पत्यजीवनं सौहार्दपूर्णं सुखमयं कर्तुं शक्यते। हिन्दुसमाजे वरकन्यायोर्कुण्डल्योर्मेलापकसमये माङ्गलिकदोषस्योपरि विशेषरूपेण विचारो भवति। यदि कन्यायाः कुण्डल्यां भौमयोग भवति तदा कन्या मातापितरौ चिन्ताग्रस्तौ भवतः। चेता हि समुद्यताः न भवन्ति। यतः माङ्गलिककन्यार्थं माङ्गलिकवरस्य आवश्यकता भवति। यतः मेलापकस्य विचारो ज्योतिश्शास्त्रस्य सुज्ञानिना पण्डितेनैव प्रकर्त्तव्यः। मेलापकविचारः अत्यन्तगूढविषयोऽस्ति। यस्य अवधानपूर्वकः सर्वाङ्गीणविचारः आवश्यकः। ग्रहमेलापकेन नक्षत्रमेलापकेन च सदैव वरस्य कुण्डल्यां तस्य स्वास्थ्य-शिक्षा-आयु-चरित्र-सन्तानोत्पादनक्षमतादीनां विचार आवश्यकः। कन्यायाः कुण्डल्यां तस्याः स्वास्त्य-स्वभाव-आयु-चरित्रप्रजजनक्षमतादिषु विषयोपरि विचारः करणीयः।

**माङ्गलिकयोगकारकयोगः –**

जन्माङ्गे मङ्गलस्थ लग्नस्थे चतुर्थस्य सप्तमस्थे अष्टमस्थे द्वाददस्थे वा सति भौमदोषो भवति। यथा केरलस्थ भावदीपिकायाम् –

**लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे**
**स्त्रीणां भर्तृ विनाशः स्यात् पुंसां भार्या विनश्यति।।**[१]

दक्षिणभारतस्य ज्योतिषग्रन्थेषु लग्नस्य स्थाने द्वितीयभावस्य ग्रहणमस्ति। अतः लग्नात्, द्वितीये- चतुर्थे-सप्तमे-अष्टमे- द्वादशे वा भौमस्य कस्यापि पापग्रहस्य वा स्थितिः कुजदोषाय भवति। यथा केरलशास्त्रे –

**धने व्यये च पाताले जामित्रे चाष्टमे कुजे।**
**स्त्री भर्तृर्विनाशश्च भर्ता च स्त्रीविनासनम्।।**[२]

अगस्त्यसंहितायां द्वितीयस्य भौमकृत् माङ्गलिकदोषस्यय चर्चा मिलति। यथा –

**धने व्यये च पाताले जामित्रे चाष्टमे कुजे।**
**भार्या भर्तृविनाशाय भर्तुश्च स्त्रीविनाशनम्।।**[३]

लग्नस्थभौमः क्रोधयुक्तप्रवृत्ति, शारीरिक-उष्णतां रक्तविकारं दुर्घटनां गृहक्लेश मानसिकोष्णतां च प्रकटी करोति। लग्ने यदि भौमः स्यात् तदा शारीरिकसौख्यतायारभावो भवति। मनुष्यः स्वोग्रतायामुपरि नियन्त्रणं कर्तुं न शक्नोति। लग्नस्थ भौम दृष्टिः चतुर्थे-सप्तमे-अष्टमे-उपरि पतति। अतः मनुष्याणां स्वास्थ्य-गृह-सम्पति-दाम्पत्यसुखं-आयुः अपि कुप्रभविताः भवन्ति। अतः लग्नस्थकुजः मानवस्य कुजदोषेन परिपूरयति।

द्वितीयस्थभौमः कुटुम्ब, धन, मुकाकृति च प्रकटी करोति। कन्यालवर्मणोक्तम् –

**अधनः कदशनतुष्टः पुरुषो विकुताननो धनस्थाने।**
**कुजनाम्रयश्च रुदिरे बवति नरो विद्यया रहितः।।**[४]

द्वितीयस्थाने अथवा मङ्गल धनस्थाने मनुष्यस्य निःर्धन, आहार – व्यवहार अव्यवस्थितः, रक्तविकारः, विद्याहीनः कुजनानाम् आश्रयः, पत्युः/ पत्न्याः स्वास्थ्यमव्यवस्थितं करोति एवं कुटुम्बे अनपेक्षितविषमता उत्पन्नति जातकस्य पारिवारिकसुखं विघटितं भवति।

चतुर्थभावस्थभौमः गृह-भूमि-वाहन-गृहोपकरण-सुखमनोनुकूलानां विचारः अनेन भवति। अतः चतुर्थस्थाने भौमः जातके गृहमध्य कलह, मनमालिनः विघटितं भवति। वाहन दुर्घटणादि करोति। किन्तु प्राचीनाचार्याः चतुर्थे भावस्थभौमकृद् दोषमत्यन्तक्षीणं कुर्वन्ति।

सप्तमभावस्यभौमः वैवाहिकसुख-विवाह-नारीणां प्रकृति-आकृति-सम्भन्धादीनां विचारः क्रियते। माङ्गलिकसन्दर्भे सप्तमभावस्य भौमस्य स्थितिः पत्युः/पत्न्याः स्वास्थ्यहानि धनहिन, पारिवारिक क्लेशः, गुप्तरोगः, सम्भवति कुण्डल्यां सप्तमस्थ भौमादि फलम् एवमुक्तम् –

**बाल्येविधवा भौमे पति संत्यक्ता दिवाकरेऽस्ति संस्थे।**
**सौरपापैर्दृष्टे कन्यैवाजवांसमुपयति।।**[५]

अन्य च –

**क्रूरैरस्ते विधवा भवति पुनर्भूः शुभाशुभैर्नारी।**
**क्रूरेऽष्टमे चविधवा स्यात् स्वार्थे सा स्वयं म्रियते।।**[६]

अष्टमभावस्थ भौमः विघ्न-वाधा-आयुष्य-विषाद-मृत्युज्ञानचिन्तनं करोति। स्त्रीजन्माङ्गे जातके अष्टमभावस्य भौम अत्यन्त दोषकारकः एवं वैधव्यस्थ प्रवलता अर्थात् जीवनसहचरस्थ मृत्युसम्भावाना दाम्पत्यजीवनस्थ प्रमुखतमो दोषऽस्ति। यदि अस्मिन् भावे शुक्रस्य गुरोः सहस्थितिः दृष्टि वा स्यात् तदा अत्यन्त कष्टकारिणी भवति।

द्वादशभावस्थ भौमः व्यय-यात्रा-शय्यासुख-भोगोपभागे सप्तमभावे पूर्णदृष्टेः कारणात् दाम्पत्यसुखप्रत्यक्षतः बाधितं भवति। जातकस्य जीवने धनभावः धनहानियोगश्च भवति। दुर्घटना– विषवाधा-अपवादः-शिरवेदना-रक्तविकार-गुप्तरोगादयश्च जातकं पीडयन्ति।

**माङ्गलिकयोगस्य परिहारः –**

ज्योतिषाश्त्रस्य प्रायः सर्वेषु फलितग्रन्थेषु परिहारोल्लिखितोऽस्ति। यथा –

**जामित्रे च यदा सौरिर्लग्ने वा हिबुकेऽथवा।**
**अष्टमे द्वादशे वाऽपि भौमदोषविनाशकृत्।।**[७]

वरकन्ययोर्मध्ये कस्याप्येकस्य कुण्डल्यां, माङ्गलिकदोषः स्यात्। अपरस्य च जातके लग्ने – चतुर्थे – सप्तमे – अष्टमे – द्वादशे वा शनिः स्यात् तदापि मङ्गलदोषः न भवति।

**अजे लग्ने व्यये चाये पाताले वृश्चिके स्थिते।**
**वृषे जाये घटे रन्ध्रे भौमदोषो न विद्यते।।**[८]

मेषस्य वृश्चिकस्य वा भौमः चतुर्थस्थाने कर्कस्य मकरस्य वा भौमः सप्तमस्थाने मीनस्य भौमः अष्टमस्थाने मेषस्य कर्कस्य वा भौमः द्वादशस्थाने यदि स्यात् तदा माङ्गलिकदोषो न भवति।

**मङ्गलदोषो परिहारार्थं पूजाविधिः –**

भौमदोषस्य परिहाहार्थं जपव्रतदानादिकार्याणि करणीयम्। मङ्गलदोषो जातक-जातिकायां भौमग्रहपूजनपूर्वकं श्रीमङ्गल-चण्डिका-स्तोत्रस्य अष्टोत्तरशतदिवसपर्यन्तं 21 आवृत्तयः जपश्च शुभाः भवन्ति। रामचरितमानसपाठप्रतिदिनं करोति। मङ्गलः यन्त्रस्य पूजा भौमवासरे दैवज्ञपण्डितद्वारा भौमस्य वैदिकमन्त्रस्य 10000 आवृत्तयः जपश्च यदि कन्या भीषणोन भौमदोषेन दुषिता स्यात् तदा कुम्भविवाहः श्रेयस्करः। वरजातके यदि एतत् दोषो परिलक्ष्यते तदा अर्कविवाह करणीयम्। तत् सहित प्रत्येकदिनं स्नानं समये हरिद्राचूर्णः लेपनं कृत्वा स्नानं करोति। प्रत्येक भौमवासरे देवीमन्दिरं दर्शनं करणीयम् श्रेयस्करः।

**उपसंहारः –**

षोडससंस्कारेषु समाजं सुव्यवस्थितकरणार्थं विधिपूर्वकविवाह-संस्कारस्य महत्त्वपूर्णस्थानमस्ति। विवाहसंस्कारद्वारा मनुष्यः गृहस्थाश्रमे प्रविष्यति। विवाहात्पूर्वं वरकन्ययोर्जन्मकुण्डल्योः मेलनस्थराशयः केवलं परम्परायाः आचार – व्यवहाराणां च सम्बन्धे ज्ञानप्राप्तिकरणमस्ति। वरकन्ययोः प्रमुखानां गुणदोषानां प्रत्यक्षं कृत्वा मेलपकद्विविधः। नक्षत्रमेलापकविचारसमये कुज-अपरान्ते विवाह करणीयम्। तदेव दाम्पत्यजीवनं सुखमयं भवति।

**पादटिप्पणी –**

1. विवाहेमेलापक पृ.सं-252
2. मेलकसुधाकर,पृ-12
3. विवाहे मेलापक,पृ-252
4. सारावली 330 अ.श्लोक-27
5. ज्यो.दी-6/82
6. ज्यो.दी-6/83
7. वै.वि.पृ-25
8. मे.सु.पृ-13